श्रीमद्भगवत्पतञ्जलिमुनिविरचितं

# व्याकरणमहाभाष्यम्

महामहोपाध्याय श्रीनागोजिभट्टविरचितमहा-
भाष्यप्रदीपोद्द्योतोद्भासितेन महामहो-
पाध्यायश्रीकैयटोपाध्याय-
विरचितेन प्रदीपेन
विराजितम्

सम्पादकः
श्रीगुरुप्रसादशास्त्री

PRATIBHA

प्रतिभा प्रकाशन, दिल्ली

It is a reproduction of earlier edition of Vyakarana Mahabhasya first published in 1938 edited by Pt. Nand Kishore Shastri, Varanasi

श्रीमद्भगवत्पतञ्जलिमुनिविरचितम्

# व्याकरणमहाभाष्यम्

तव्द्याख्यानभूतेन उपाध्यायकैयटप्रणीतेन भाष्यप्रदीपेन, तद्व्याख्यानभूतेन नागेशभट्टविरचितेन भाष्यप्रदीपोद्द्योतेन, भाष्यव्याख्यानभूतेन भट्टोजिदीक्षितविरचितेन शब्दकौस्तुभेन च विराजितः

श्रीगुरुप्रसादशास्त्रिविरचितया

भाष्यादिव्याख्यानभूतयाऽभिनवराजलक्ष्मीटीकया चाऽलङ्कृतः

तस्य नवाह्निकरूपः

**प्रथमो भागः ( प्रथमं खण्डम् )**

संस्कर्त्ता

श्रीगुरुप्रसादशास्त्री

सम्पादकः

पण्डितनन्दकिशोरशास्त्री

RATIBHA

प्रतिभा प्रकाशन, दिल्ली

॥ श्रीः ॥

महामहोपाध्यायभट्टोजिदीक्षितविरचितेन शब्दकौस्तुभेन समलङ्कृतम् ।

# व्याकरण-महाभाष्यम्

## तद्व्याख्यानभूतः कैयटविरचितः प्रदीपः

### तद्व्याख्यानभूतो नागेशभट्टविरचित उद्द्योतः ।

### भाष्यादित्रिवलिव्याख्यानभूता श्रीगुरुप्रसादशास्त्रिविरचिताऽभिनवराजलक्ष्मीश्च ।

## तत्र प्रथमाध्याये प्रथमपादे प्रथममाह्निकम्

*( अथ श्रीनागोजीभट्टकृत उद्द्योतः )*

नत्वा साम्बशिवं देवीं वागधिष्ठानिकां गुरून् ।
पाणिन्यादिमुनीन् वन्द्यान् पितरौ च **सतीशिवौ** ॥१॥
**नागेशभट्टो** नागेशभाषितार्थविचक्षणः ।
**हरिदीक्षित**पादाब्जसेवनावाप्तसन्मतिः ॥ २ ॥
याचकानां कल्पतरोररिकक्षहुताशनात् ।
शृङ्गवेरपुराधीश**रामतो** लब्धजीविकः ॥ ३ ॥
नाऽविस्तीर्णं न विस्तीर्णं मध्यानामपि बोधकृत् ।
**भाष्य-प्रदीप**-व्याख्यानं कुर्वेऽहं तु यथामति ॥४॥

*( अथ श्रीकैयटकृतः प्रदीपः )*

सर्वाकारं निराकारं विश्वाध्यक्षमतीन्द्रियम् ॥
सदसद्रूपताऽतीतमदृश्यं मायया वृतैः ॥ १ ॥

---

*अथ श्रीगुरुप्रसादशास्त्रिकृता राजलक्ष्मीः*

नुमोऽनवद्यसद्ग्रन्थविद्योद्भासितदिङ्मुखान् ।
मरुमण्डलमार्त्तण्ड**श्रीहिरामा**भिधान् गुरून् ॥ १ ॥
**महाभाष्यप्रदीपादित्रिवलि**ग्रन्थिभेदिनी ।
**राजलक्ष्मीः** परं टीका विद्वज्जनमनोहरा ॥ २ ॥

**(उद्द्योते-)** साम्बशिवादीन् नत्वा अहं नागेशभट्टो मध्यानामपि बोधकृत् महाभाष्यप्रदीपव्याख्यानं यथामति कुर्वे इत्यन्वयः। **साम्बशिवं**=जगत्पालनादिशक्तिविशिष्टं शिवं ब्रह्म, अर्द्धनारीश्वरं वा। **वागधिष्ठानिकां**=वागधिष्ठात्रीं सरस्वतीम्। **गुरून्**=जगद्गुरून्। गुरूनिति वन्द्यानिति च पाणिन्यादिमुनित्रयविशेषणमित्यन्ये। **पितरौ**=स्वमातापितरौ॥ नागोजीभट्टः स्वकीयस्य प्रसिद्धस्य 'नागेशभट्टे'त्युपनाम्नः स्वयमेवार्थमाह-**नागेशभाषितेति** । **नागेशभट्टः**-फणिभाषितभाष्याब्धिसारज्ञ इत्यर्थः। प्राचीनव्याख्यानृवैलक्षण्यसूचकस्तुशब्दः।

**(प्रदीपे-)**'नारायणं प्रणम्य सरस्वतीं च नत्वा गुरोर्महेश्वरस्य चरणवन्दनञ्च कृत्वाऽहं कैयटो यथागमं महाभाष्यार्णवाऽवारपारीणं विवृतिप्लवं विधास्ये'इत्येवमत्रान्वयो बोध्यः । तत्र **सर्वाकार**मित्यत्र-सर्वे आकारा[२] घटपटादयो यस्यासौ सर्वाकारस्तमिति, सर्वेषां घटपटादीनामाकार उपादानकरणमिति वा विग्रहः । एवं **निराकार**मित्यत्र-निर्गता आकारा यस्मात्तमिति-निष्क्रान्त आकारात्तमिति वा विग्रहः । यथा मृदादीनां घटपटादिकार्यातिरिक्तं दृश्यं-बहिरिन्द्रियवेद्यं-स्वरूपं वर्त्तते एवं ब्रह्मणो घटपटादिकार्यातिरिक्तं बहिरिन्द्रियगोचरं रूपं नास्तीति ब्रह्मणो निराकारता सूपपन्ना।

**विश्वाध्यक्षं**-लोकद्रष्टारम् । लोककर्त्तारमिति वा । **अतीन्द्रियम्**-इन्द्रियरहितम् । **सदसद्रूपतातीतम्**-अनिर्वचनीयताऽतीतम् । प्रपञ्चधर्मसदसत्त्वरहितमिति वा ।

---

**( महामहोपाध्यायश्रीभट्टोजिदीक्षितविरचितः-श्रीशब्दकौस्तुभः )**

विश्वेशं सच्चिदानन्दं वन्देऽहं योऽखिलं जगत् ।
चरीकर्त्ति वरीभर्त्ति संजरीहर्त्ति लीलया ॥ १ ॥
नमस्कुर्वे जगद्वन्द्यं **पाणिन्या**दिमुनित्रयम् ।
श्री**भर्तृहरि**मुख्यांश्च सिद्धान्तस्थापकान्बुधान् ॥ २ ॥

---

१ 'धीशाद्रामतो' इति पाठान्तरम् ।

२ यद्विवर्त्तभूतं जगदित्यर्थः ।

( उद्द्योतः ) 'अस्त्यप्रयुक्त' इत्यादेः प्रकृतोपयोगमाह–**प्रयोगमूलत्वादिति** । **'लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः'** इत्यनेन प्रयुक्तेषु साध्वसाधुषु प्रयुक्तसाध्वन्वाख्यानेन तेषु धर्मः प्रयुक्ताऽसाधुष्वधर्म इत्यर्थकेनेदं सूचितम् । एवं चाऽप्रयुक्तानामप्रयोगेणैवाऽसाधुत्वानुमानादसाधूनामप्यनेनान्वाख्यानादप्रामाण्यमिति भावः । वार्तिकोक्तनियमानुपपत्तिश्चेत्यपि बोध्यम् ॥ भाष्ये **किमत इति** । अप्रयुक्त[1]सत्त्वे नाऽस्माकमनिष्टं, साधुमात्रार्थत्वाद्व्याकरणस्येत्यर्थः । उत्तरम्–**प्रयोगादिति** । तथा चाऽप्रयोगादसाधुत्वानुमानमिति भावः ॥

[ आक्षेपासङ्गतिसूचकतटस्थभाष्यम् ]

**इदं तावद्विप्रतिषिद्धम्–यदुच्यते–'सन्ति वै शब्दा अप्रयुक्ता' इति । यदि सन्ति[2] नाऽप्रयुक्ताः, अथाऽप्रयुक्ता न सन्ति, 'सन्ति चाप्रयुक्ताश्चे'ति विप्रतिषिद्धम् । प्रयुञ्जान एव खलु भवानाह–'सन्ति शब्दा अप्रयुक्ता' इति ! । कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्यात् ? ॥**

( प्रदीपः ) यथा घटादीनां विनाऽप्यर्थक्रियया सत्त्वं गम्यते नैवं शब्दानां, ते हि सर्वदा व्यवहाराय प्रयुज्यमानाः सन्तः सत्त्वेनावसीयन्ते इत्याह–**इदमिति** । **कश्चेदानी**मिति उपहासपरम् ॥

( उद्द्योतः ) विप्रतिषिद्धत्वमुपपादयति–**यथेति** । एवंच सत्त्वे प्रयोग आवश्यक एव । अप्रयोगे च सत्त्वमेव न स्यादिति भावः । ननु लक्षणवशेन सत्त्वं, केनाप्यप्रयोगाच्चाऽप्रयुक्तत्वमिति न विरोधोऽतो भाष्ये–**प्रयुञ्जान एवेति** । ननु मया प्रयुक्तश्चेत्किं, तत्र सोपहासमाह–**कश्चेदानीमिति** । स्वयमेव प्रयोगं कृत्वा **'सन्ति चाऽप्रयुक्ता'** इत्यादीनां शब्दानां प्रयोगे साधुर्योग्यः स्यादित्यर्थः । त्वत्प्रयोगेणैव प्रयुक्तत्वाऽवगमेऽप्रयुक्तत्वोक्तिर्विरुद्धेति भावः ॥

[ आक्षेपसङ्गतिप्रदर्शक**मुत्तर**भाष्यम् ]

**नैतद्विप्रतिषिद्धम् । 'सन्ती'ति तावद्ब्रूमो यदेताञ्शास्त्रविदः शास्त्रेणानुविदधते । 'अप्रयुक्ता' इति ब्रूमो यल्लोकेऽप्रयुक्ता इति ॥**

**यदप्युच्यते–'कश्चेदानीमन्यो भवज्जातीयकः पुरुषः शब्दानां प्रयोगे साधुः स्या'दिति । न ब्रूमोऽस्माभिरप्रयुक्ता इति ॥ किं तर्हि ? ॥ लोकेऽप्रयुक्ता इति ॥**

( प्रदीपः ) उत्तरं तु—शास्त्रदृष्ट्या प्रकृतिप्रत्ययादिसद्भावादनुमितसत्त्वाः, व्यवहारे तु न दृश्यन्त इत्युक्तम् ॥

[ आक्षेपभाष्यम् ]

**ननु च भवानप्यभ्यन्तरो लोके ? ॥**

[ **समाधान**भाष्यम् ]

**अभ्यन्तरोऽहं लोके, न त्वहं लोकः ॥**

---

❀ **राजलक्ष्मीः** ❀

पादयन्नाह–**प्रयोगेति । अस्याःस्मृतेः**–व्याकरणस्मृतेः ।

( **उद्द्योते**– ) **वार्त्तिकोक्तेति** । 'शास्त्रेण धर्म'इति पूर्वमुक्तस्य नियमस्यानुपपत्तिरित्यर्थः । यदि अप्रयुक्तान्वाख्यानं शास्त्रेण क्रियेत तर्हि शास्त्रस्याऽपूर्वविधित्वेन वैयर्थ्याभावान्नियमानुपपत्तिरिति भावः । **उत्तरं**–आक्षेपकस्य तटस्थं प्रत्युत्तरम् ।

( **भाष्ये**– ) तटस्थः पूर्वपक्षमेव दूषयति–**इदमिति** । **इति**–इत्येवमभिधानम् । **विप्रतिषिद्धम्**–मिथो विप्रतिषिद्धम् । **प्रयुञ्जानः**–ऊषेत्यादिशब्दान् प्रयुञ्जान एव । 'इत्याहे'त्यन्वयः । भवज्जातीयकः–भवादृशः । शब्दानां प्रयोगे–सन्त्यप्रयुक्ता इति भाषणे ।

( **प्रदीपे**– ) **अर्थक्रियया**–जलानयनादिव्यापारेण । **सत्त्वेनावसीयन्ते**–सन्तीति निश्चीयन्ते ।

( **उद्द्योते**– ) **एवञ्च**–तत्सत्तानिश्चयाय तत्प्रयोगस्यावश्यकत्वे च ।

(**भाष्ये**–) प्रश्नवादी तटस्थं प्रतिसमाधत्ते–**नैतदिति । अनुविदधते**–संस्कुर्वन्ति । **यत्**–यतः । **अप्रयुक्ताः** अर्थबोधनायाऽप्रयुक्ताः । उपहासमपनयति–**यदपीति । न ब्रूम इति** । नहि मत्प्रयोगो लोकप्रयोगः । व्यवहारे तेषामप्रयोगादित्याशयः ।

---

❀ **शब्दकौस्तुभः** ❀

**वाक्यमितिहासः पुराणं वैद्यकमित्येतावान्प्रयोगस्य विषय'** इति । बह्वृचानामाम्नायो बाह्वृच्यम् । 'छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्य' इति ञ्यप्रत्ययः । 'चरणाद्धर्माम्नाययो'रित्युक्तत्वादाम्नाये । अथर्वणा प्रोक्तो वेद अथर्वा, उपचारात्प्रयोग इत्येके । वसन्तादिषु 'अथर्वन्' 'आथर्वण' इत्युभयोः पाठसामर्थ्यात्प्रोक्तप्रत्ययस्य वैकल्पिको लुगिति तु तत्त्वम् । अत एव भाष्ये वक्ष्यते–'तेन प्रोक्तमिति प्रकृत्य ऋषिभ्यो

---

१ 'सत्त्वे' पा० ।

२ 'यदि तावत्सन्ति' पा० ।

It is a reproduction of earlier edition of Vyākaraṇa Mahābhāṣya first published in 1938 edited by Pt. Nand Kishore Shastri, Varanasi

श्रीमद्भगवत्पतञ्जलिमुनिविरचितं

# व्याकरणमहाभाष्यम्

महामहोपाध्याय श्रीनागोजिभट्टविरचितमहा-
भाष्यप्रदीपोद्द्योतोद्भासितेन महामहो-
पाध्यायश्रीकैयटोपाध्याय-
विरचितेन प्रदीपेन
विराजितम्
तस्यायं-

{तस्य द्वितीय-तृतीय-चतुर्थ पादाः}

पण्डितराजश्रीस्नेहिरामशास्त्रिणां पौत्रेण, न्यायाचार्य पण्डित
श्री शिवनारायणशास्त्रिणां पुत्रेण, श्रीगुरुप्रसादशास्त्रिणा
व्याकरणाद्याचार्येण महता परिश्रमेण संशोधितं,
टिप्पण्या संयोजितञ्च

PRATIBHA

प्रतिभा प्रकाशन, दिल्ली

॥ श्रीमहागणपतये नमः ॥

## श्रीमद्भगवत्पतञ्जलिमुनिविरचितं

# व्याकरणमहाभाष्यम् ।

### उद्द्योतपरिवृतप्रदीपप्रकाशितम् ।

### तस्य चेदं

### प्रथमस्याऽध्यायस्य द्वितीये पादे प्रथममाह्निकम् ।

### गाङ्कुटादिभ्योऽञ्णिन्ङित् ॥ १।२।१ ॥

॥ * ॥ ङित्किद्वचने तयोरभावादप्रसिद्धिः ॥ * ॥ ङित्किद्वचने तयोरभावात्—ङकारककारयोरभावात्—ङित्त्वकित्त्वयोरप्रसिद्धिः । सता ह्यभिसम्बन्धः शक्यते कर्तुम् । न चाऽत्र ङकारककारावितौ पश्यामः । तद्यथा—'चित्रगुर्देवदत्तः' इति; यस्य ता गावो भवन्ति स एवं ताभिः शक्यतेऽभिसम्बन्द्धुम् ॥

प्रदीपः] गाङ्कुटादिभ्यः । चत्वारोऽत्र पक्षा उपक्षिप्ता भाष्ये—ङित्त्वकित्त्वसम्बन्धप्रतिपादनम्, भावनम्, सञ्ज्ञाकरणम्, अतिदेशश्चेति । तत्राद्यपक्षनिराकरणाय वार्तिकमुपन्यस्यति—ङित्किद्वचन इति । सता हीति । विद्यमानेन वस्तुना सम्बन्धोऽर्थस्य शक्यते कर्तुम् । न च गाङ्कुटादिभ्यः परस्य प्रत्ययस्य ङकार इत्सञ्ज्ञकोऽस्ति येन

उद्द्योतः] गाङ्कुटादिभ्यो । अस्य तद्वदतिदेशत्वेन वार्तिकानुत्थानमाशङ्क्याह—चत्वारोऽत्रेति । उपक्षिप्ताः । दूषणद्वारा साक्षाच्चोक्ता इत्यर्थः । तत्राद्येति । तत्र हि गाङ्कुटादिभ्यः परोऽञ्णित्प्रत्यय इत्सञ्ज्ञकङकारयुक्त इत्यर्थः । तयोरिति तच्छब्देन गुणभूतयोरपि ङकारककारयोर्बुद्धिस्थतया परामर्श इत्याह भाष्ये—ङकारककारयोरिति । यथा चैतत्तथा पस्पशायामुक्तम् । ङित्त्वकित्त्वयोरप्रसिद्धिरिति । तद्व्यवहाराऽप्रसिद्धिरित्यर्थः । दाह— येन तस्येति । सत्त्वे वेति । 'यङादे'रिति शेषः । अञ्णिद्ग्रहणवैयर्थ्यापत्त्या च ... राजीतिवल्लोपाऽभावार्थमनुवाद इति न शङ्क्यम् । ननु शशविषाणादिशब्दैरसतोऽपि विषाणेन शशस्य सम्बन्धः प्रतिपाद्यते इति चेन्न, तद्वदस्याप्यप्रामाण्यप्रसङ्गात् ।

१ 'वाऽभि' पाठा० । २ 'एताभिः' । 'एव ताभ्यां शब्दाभ्यां' । ३ 'नाऽभिसं' । ४ 'वक्तुम्' ।

अतः किम् ? ॥ न साधीयोऽर्थवत्ता सिद्धा भवति ॥ न ब्रूमः—अर्थवत्ता न सिध्यतीति । वर्णिता अर्थवत्तान्वयव्यतिरेकाभ्यामेव । तत्र कुत एतदयं प्रकृत्यर्थोयं प्रत्ययार्थ इति । न पुनः प्रकृतिरेवोभावर्थौ ब्रूयात् । प्रत्यय एव वा ? ॥ सामान्यशब्दा एते एवं स्युः । सामान्यशब्दाश्च नान्तरेण विशेषं प्रकरणं वा विशेषेष्ववतिष्ठन्ते । यतस्तु खलु नियोगतो वृक्ष इत्युक्ते स्वभावतः कस्मिंश्चिदर्थे प्रतीतिरुपजायते । अतो मन्यामहे—नेमे सामान्यशब्दा इति । न चेत्सामान्यशब्दाः, प्रकृतिः प्रकृत्यर्थे वर्तते, प्रत्ययः प्रत्ययार्थे ॥ किं पुनरिमे वर्णा अर्थवन्तः, आहोस्विदनर्थकाः ? ॥ * ॥ वर्णस्यार्थवदनर्थकत्वे उक्तम् ॥ * ॥ [ वर्णस्यार्थवदनर्थकत्व उक्तम् ] ॥ किमुक्तम् ? । 'अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनाद्वर्णव्यत्यये चार्थान्तरगमनाद्वर्णानुपलब्धौ चानर्थगतेः सङ्घातार्थवत्त्वाच्च । सङ्घातस्यैकार्थत्वात् सुबभावो वर्णात्' ।

---

प्र.] भिधाने साहायकमात्रं कुर्यात् । अतः किं न साधीय इति । प्रकृतिः सर्वानर्थानभिदधाति, द्योतिकास्तु विभक्तय इति सिद्धैवाऽर्थवत्ता । प्रत्यय एवेति । ततश्च प्रकृतेरर्थवत्ता न सिध्यतीति तदवस्थो दोष इत्यर्थः । सामान्यशब्दा इति । प्रकृतिश्चेत्सर्वानर्थानभिदध्याद्वृक्ष इत्युक्ते सर्वा सङ्ख्या प्रतीयेत, प्रत्ययो वा सर्वस्य प्रातिपदिकस्याऽर्थं प्रत्याययेदित्यर्थः । यतस्तु खल्विति । प्रकरणादिना

---

उ.] अधुनेति । इदमोऽधुना प्रत्यय इति पक्ष इदम् । शङ्कितुराशयं तद्वचसा ज्ञातुं पृच्छति—भाष्ये—अतः किमिति । उक्तेन बहवः शब्दा इत्यादिना ग्रन्थेन किं साधितं त्वयेति भावः । इतरः स्वाशयमाह—न साधीय इति । तदेवाह—न पुनरिति । अन्यतरद्द्योतकमिति भावः । तद्व्याचष्टे—प्रकृतिरित्यादिना । सिद्धैवेति । किन्तु विपरीतं प्राप्नोतीति भावः । तदाह—ततश्चेति । एवं च प्रकृतेरर्थवत्त्वाऽभावात्सञ्ज्ञा न स्यादिति भावः । परिहरति—सामान्यशब्दा इति । एवं सत्येते सामान्यशब्दाः स्युस्तत्त्वं चैषां न दृश्यत इति भावः । तदुपपादयति—प्रकृतिश्चेदित्यादिना । वृक्ष इत्युक्ते इत्यस्य प्रातिपदिकप्रयोगमात्रे तात्पर्यम् । सामान्यशब्दाः कीदृशा इत्यत आह—भाष्ये—सामान्यशब्दाश्चेति । चो ह्यर्थे । विशेषं—विशेषबोधकपदान्तरसमभिव्याहारम् । एवं च प्रकरणादिसापेक्षतयाऽर्थप्रत्यायकत्वं सामान्यशब्दत्वमिति भावः । एते तु नैवमित्याह—यतस्त्विति । त्वद्रीत्या हि प्रकृतिः स्वार्थं प्रत्ययार्थसामान्यं चाभिदधाति, तत्र विना प्रकरणादिकं केवलस्वार्थस्य बोधः कथमपि न स्यात् । दृश्यते तु सः, सङ्ख्यादेश्च न सामान्यरूपेणापि बोधः । एवं प्रत्ययमात्रान्न कदापि प्रकृत्यर्थबोधः । प्रकरणाद्यसत्त्वेपि च स्वार्थोपस्थितिः शास्त्रवासनावताम् । अतो नैषामुभयार्थवाचकत्वरूपं सामान्यशब्दत्वम् । ततः किमित्याह—न चेदित्यादि । प्रत्ययार्थे—तद्द्योत्यार्थे । 'पञ्चकं प्रातिपदिकार्थ' इति मुख्यपक्षे तस्य द्योतकत्वात् । वर्णवारणायाऽर्थवद्ग्रहणमित्युक्तम् । तत्र वर्णानामानर्थक्यं दृढीकर्तुं पृच्छति—भाष्ये—किं पुन-

It is a reproduction of earlier edition of Vyākaraṇa Mahābhāṣya first published in 1938 edited by Pt. Nand Kishore Shastri, Varanasi

श्रीमद्भगवत्पतञ्जलिमुनिविरचितं

# व्याकरणमहाभाष्यम्

महामहोपाध्याय श्रीनागोजिभट्टविरचितमहा-
भाष्यप्रदीपोद्द्योतोद्भासितेन महामहो-
पाध्यायश्रीकैयटोपाध्याय-
विरचितेन प्रदीपेन
विराजितम्

तस्यायं–

## द्वितीयोऽध्यायः

पण्डितराजश्रीस्नेहिरामशास्त्रिणां पौत्रेण, न्यायाचार्य पण्डित
श्री शिवनारायणशास्त्रिणां पुत्रेण, श्रीगुरुप्रसादशास्त्रिणा
व्याकरणाद्याचार्येण महता परिश्रमेण संशोधितं,
टिप्पण्या संयोजितञ्च

प्रतिभा प्रकाशन, दिल्ली

**एवमेतस्मिन्नुभयतो व्यवच्छिन्ने[1] यदि स्वार्थं[2] जहाति कामं जहातु, न जातुचित्पुरुषमात्रस्यानयनं भविष्यति ॥ अथ वा पुनरस्त्वजहत्स्वार्था वृत्तिः ॥**

प्र.]स्यात्, न तु स्वामिमात्राक्षेपः।तत्र भेदपक्षे राजा पुरुषं स्वाम्यन्तरेभ्यो निवर्त्त्य स्वार्थं जहाति । पुरुषस्त्वजहदपि स्वार्थं स्वान्तरेभ्यो राजानं[3] निवर्त्तयतीति । ततश्च कृतकार्यस्य भवतु राजार्थस्य निवृत्तिः। अकृतकार्यस्य निवृत्तौ वृत्तिरेव न स्यात् । एवं संसर्गेपि योज्यम् । उभयत इति । उभयस्मिन् परस्परेणावच्छिन्ने इत्यर्थः ।

उ.]सामर्थ्यलक्षणपक्षे इत्यर्थः।**स्वाम्यन्तरेभ्यो निवर्त्त्येति**।राज्ञः पुरुषो भार्यायाश्चेत्यादाविव भार्यादिसंबन्धवद्व्यक्त्युपस्थापकत्वान्निवर्त्त्येत्यर्थः।**स्वार्थं जहातीति**। राजपदं व्यक्तिविशेषोपस्थितौ तात्पर्यग्राहकंभूत्वा वाक्यप्रसिद्धस्वार्थं त्यजतीत्यर्थः।एतावतैव-परार्थाभिधायकत्वमिति भावः। **निवर्तयतीति**। राज्ञः पुरुषोऽश्वश्चेत्यादावश्वादिरूपस्वान्तरनिरूपितस्वामित्ववद्व्यक्त्युपस्थापकत्वं राजपदस्य निवर्त्तयतीत्यर्थः । इदं दृष्टान्तार्थम् । यथा विशेषणत्वेनानन्वितोपि पुरुषो राजानं स्वान्तरेभ्यो निवर्त्तयति, एवं राजा विशेषणत्वेनाऽनन्वित एव पुरुषं स्वाम्यन्तरेभ्यो निवर्त्तयिष्यतीति भावः। **भवतु राजार्थस्येति**।द्योतकतामात्रेण चारिताथ्योद्राजपदात्तदनुपस्थितिरेव निवृत्तिरित्यर्थः। **वृत्तिरेवन स्यादिति**।अर्थवत्त्वाभावेनसुबन्तत्वाभावादिति भावः।**एवं संसर्गेपीति**। संसर्गघटितलक्षणपक्षेऽपीत्यर्थः। भेदस्य तद्व्याप्यत्वात्स्वाम्यन्तरेभ्यो निवर्त्त्येत्यादि बोध्यम्।भाष्ये—**अन्येभ्यः स्वामिभ्यो निवर्त्तयतीत्**युक्त्या स्वस्वरूप[4]स्वामिनो न निवर्त्तयतीत्यर्थलाभात्संसर्गो बोधितः[5] । एतेन **कः पुनर्भेदः संसर्गो** वेति प्रश्ने भेदप्रतिपादनेपि संसर्गाऽप्रतिपादनान्न्यूनतेत्यपास्तम् । किं चा**ऽन्येभ्यः स्वामिभ्यो निवर्त्तयतीत्**यनेनाऽन्यस्वामिसंबन्धनिवृत्तं पुरुषं बोधविषयीकरोतीत्यर्थकेन भेदादेः शाब्दबोधाऽविषयत्वं सूचयति। '**पुरुषो राजानमन्येभ्य**' इति दृष्टान्तार्थम् । इतोपि तयोर्बोधाऽविषयत्वं बोध्यम् । नहि राज्ञि तद्भेदतत्संसर्गभानं कस्यापि संमतमिति दिक् । **स्वार्थं जहातीति** । 'उपसर्जनपद'मिति शेषः । यत्तु भेदसंसर्गौ समासवाच्याविति, तन्न,भेदप्रकारकबोधाननुभावात् । किं च वृत्तिवर्त्तनवादे जहत्स्वार्थत्वं वृत्तेर्व्युत्पादयितुमेष ग्रन्थः । तत्र संसर्गस्य समासवाच्यत्वे तत्र प्रतियोगित्वेन पूर्वपदार्थस्यान्वयावश्यकत्वे जहत्स्वार्थत्वभङ्ग एव स्यात् । उक्तरीत्या भाष्याक्षरस्वारस्याविरोधाच्च । तस्माद्वेदान्तिमते तत्त्वमस्यादिवाक्यादावखण्डार्थबोध इव वृत्तौ बोधः । अयमेव चैकार्थीभावः । तन्नये वाक्ये पदेषु तत्तत्कार्यप्रवृत्तिवद्वृत्तिघटके आत्वादिप्रवृत्तिरिति सुधियो विभावयन्तु। इमौ भेदसंसर्गौ द्वन्द्वेपि,समूहविशेषस्यैव प्रतीतेः । बहुव्रीहावपि संबन्धित्वेन व्यक्तिविशेषस्यैव[6] भानमित्याभाति । राजपुरुषयोरेव व्यवच्छिन्नत्वादुभयतो व्यवच्छिन्नमन्यन्नास्तीत्यत आह—**उभयस्मिन्निति** ।

१ 'व्यवच्छिन्नं' । २ क्वचिन्न । ३ 'निवर्त्तयति राजानमिति' । ४ 'स्वस्वरूपं'। ५ अबाधितः । ६ 'सम्बन्धिव्यक्ति' ।

It is a reproduction of earlier edition of Vyākaraṇa Mahābhāṣya first published in 1938 edited by Pt. Nand Kishore Shastri, Varanasi

श्रीमद्भगवत्पतञ्जलिमुनिविरचितं

# व्याकरणमहाभाष्यम्

महामहोपाध्याय श्रीनागोजिभट्टविरचितमहा-
भाष्यप्रदीपोद्द्योतोद्भासितेन महामहो-
पाध्यायश्रीकैयटोपाध्याय-
विरचितेन प्रदीपेन
विराजितम्
तस्यायं-

## तृतीयोऽध्यायः

पण्डितराजश्रीस्नेहिरामशास्त्रिणां पौत्रेण, न्यायाचार्य पण्डित श्री शिवनारायणशास्त्रिणां पुत्रेण, श्रीगुरुप्रसादशास्त्रिणा व्याकरणाद्याचार्येण महता परिश्रमेण संशोधितं, टिप्पण्या संयोजितञ्च

PRATIBHA

प्रतिभा प्रकाशन, दिल्ली

कारणम्?॥'सामान्यकृतत्वात्'।सामान्येनैवाऽत्र णिज्भविष्यति–'हेतुमती'ति॥ किं कारणम्? ॥ हेतुतो ह्यविशिष्टम्'। हेतुतो ह्यविशिष्टमेतद्भवति । तुल्या हि हेतुता देवदत्ते चादित्ये च ॥ न सिध्यति । 'स्वतन्त्रस्य प्रयोजको हेतुसंज्ञो भवती'त्युच्यते, न चाऽसावादित्यं प्रयोजयति॥*॥ स्वतन्त्रप्रयोजकत्वादप्रयोजक इति चेन्मुक्तसंशयेन तुल्यम्[१] ॥*॥ यं भवान् स्वतन्त्रप्रयोजकं मुक्तसंशयं न्याय्यं मन्यते[२]–'पाचयत्योदनं देवदत्तो यज्ञदत्तेने'ति, तेनैतत्तुल्यम् ॥ कथम्? ॥ ॥*॥ प्रवृत्तिर्ह्युभयत्राऽनपेक्ष्य[३] ॥*॥ प्रवृत्तिर्ह्युभयत्रानपेक्ष्यैव किंचिद्भवति देवदत्ते चादित्ये च । नेह कश्चित्परोऽनुगृहीतव्य इति प्रवर्तते । [॥*॥ सर्व इमे स्वभूत्यर्थम्[४] ॥*]॥ सर्व इमे स्वभूत्यर्थं[५] प्रवर्तन्ते । ये तावदेते गुरुशुश्रूषवो नाम तेऽपि स्वभूत्यर्थमेव प्रवर्तन्ते, पारलौकिकं च नो भविष्यतीह च नः प्रीतो गुरुरध्यापयिष्यतीति । तथा य एते दासाः[६] कर्मकरा नाम, ते[७]ऽपि स्वभूत्यर्थमेव प्रवर्तन्ते,भक्तं चैलं[८] च लप्स्यामहे,परिभाषाश्च ननो[९] भविष्यन्तीति । तथा य एते शिल्पिनो नाम तेऽपि स्वभूत्यर्थमेव प्रवर्तन्ते वेतनं च लप्स्यामहे मित्राणि च नो भविष्यन्तीति । एवमेतेषु सर्वेषु स्वभूत्यर्थं प्रवर्तमानेषु–॥*॥ कुर्वतः प्रयोजक इति चेत्तुल्यम् ॥*॥ यदि क[१०]श्चित्कुर्वतः

प्र.]तृतीयासमासः। तत्र प्रकृतेरिव प्रकृतिवदित्येवं प्रकृतिवदतिदेशात्कर्तरि तृतीया भवति । लकारस्तु प्रधान एव कर्त्तरि भवति नातिदेशिके । सामान्यकृतत्वादिति। सामान्यलक्षणेनैव सिद्धत्वादित्यर्थः । देवदत्ते चेति । देवदत्तविषया अन्यस्य हेतुते-

उ.]त्यत्र प्राप्तेः । नातिदेशिके इति । णिच्प्रकृत्यर्थकर्तृत्वाऽतिदेशेऽपि णिजर्थकर्तृत्वाऽतिदेशाऽभावान्न तदुत्तरलेनास्थाऽभिधानमित्यर्थः । 'सूर्यमुद्गमयते' इत्यादावादित्यस्य प्रयोज्यत्वात् चेन देवदत्तस्यापि तत्सजातीयताध्वननाद्धेतुतेत्यनुपपन्नमत आह–देवदत्तविषयाऽन्यस्येति । भाष्ये–स्वतन्त्रस्य प्रयोजक इति । स्वाभिप्रेतमात्रोद्देशेन प्रवृत्तस्य प्रवर्त्तक इत्यर्थः । एव'म्प्रयोजयती'त्यस्य च स्वाभिप्रेतोद्देशेन प्रवृत्तं प्रवर्त्तयतीत्यर्थः । स्वाभिप्रेतमात्रोद्देश्यकप्रयोज्यनिष्ठप्रवृत्त्यनुकूलव्यापारवत्त्वं हि प्रयोजकत्वमिति फलितम् । सर्वत्र स्वशब्देन प्रयोजकः । एवं प्रयोजकाभिप्रेतमात्रोद्देश्यकप्रवृत्त्याश्रयत्वं प्रयोज्यत्वम् । तदेव च स्वतन्त्रत्वम् । न चैतत्सूर्ये इति भावः । समाधत्ते भाष्ये–स्वतन्त्रेति । स्वतन्त्रप्रयोजकस्य

१ अत्र–'स्वतन्त्रप्रयोजकत्वादप्रयोजक इति' चेन्मुक्तसंशयेन तुल्यमेतद्भवती'ति व्याख्याभाष्यं लुप्तं स्यादित्यन्ये । २ 'मन्यते' । ३ 'पेक्षा' पा० । ४ इदं लुप्तम् । ५ 'भूत्यर्थमेव' । ६ 'यतद्दासकर्मकरं नामैतदपि' । ७ 'एतेऽपि' । ८ 'चैलं' । ९ 'षाश्च नो' । 'षाश्च ततो' । १० 'कश्चित्प्रयोजको नाम कुर्वतः' ।

It is a reproduction of earlier edition of Vyākaraṇa Mahābhāṣya first published in 1938 edited by Pt. Nand Kishore Shastri, Varanasi

श्रीमद्भगवत्पतञ्जलिमुनिविरचितं

# व्याकरणमहाभाष्यम्

महामहोपाध्याय श्रीनागोजिभट्टविरचितमहा-
भाष्यप्रदीपोद्द्योतोद्भासितेन महामहो-
पाध्यायश्रीकैयटोपाध्याय-
विरचितेन प्रदीपेन
विराजितम्

तस्यायं-

## चतुर्थोऽध्यायः

पण्डितराजश्रीस्नेहिरामशास्त्रिणां पौत्रेण, न्यायाचार्य पण्डित
श्री शिवनारायणशास्त्रिणां पुत्रेण, श्रीगुरुप्रसादशास्त्रिणा
व्याकरणाद्याचार्येण महता परिश्रमेण संशोधितं,
टिप्पण्या संयोजितञ्च

प्रतिभा प्रकाशन, दिल्ली

**प्रयोजनानि–तदर्थमेषा परिभाषा कर्त्तव्या । प्रतिविधेयश्च दोषेषु ।**

॥ * ॥ तद्धितविधानार्थं तु ॥ * ॥ **तद्धितविधानार्थन्तु ङ्याब्ग्रहणं कर्त्तव्यं–ङ्याबन्तात्तद्धितोत्पत्तिर्यथा स्यात् । कालितरा । हरिणितरा । खट्वातरा । मालातरा ॥ किं पुनः कारणं न सिध्यति ?** ॥ * विप्रतिषेधाद्धि-तद्धितबलीयस्त्वम् * ॥ **विप्रतिषेधाद्धि तद्धितोत्पत्तिः प्राप्नोति ॥ (तत्र को दोषः?।)** * ॥ तत्र समासान्तेषु दोषः ॥ * ॥ **तत्र समासान्तेषु दोषो भवति–बहुगोमत्का । बहुयवमत्का । समासान्ता अपि ङ्याबन्तात्स्युः** ॥*॥ त्यूङोश्चापि ग्रहणं ॥*॥ **त्यूङोश्चापि ग्रहणं कर्त्तव्यं भवति । युवतिका । ब्रह्मबन्धुकेति ।**

---

**प्रदीपः]** विभक्त्याश्रयकार्ये क्रियमाणे लिङ्गविशिष्टपरिभाषा नेष्यत इत्यर्थः। **प्रतिविधेयमिति ।** अच्प्रकरणे 'शक्तिलाङ्गुलाङ्कुशे'त्यत्र वार्तिके घटग्रहणेनैव घटीग्रहणे सिद्धे घटीग्रहणमस्याः परिभाषाया अनित्यत्वज्ञापनार्थं, तेनानिष्टे विषये नोपतिष्ठते । **तद्धितविधानार्थं त्विति ।** सति ङ्याब्ग्रहणे तद्धितविधौ प्रकृतित्रयाधिकारसामर्थ्यात् पूर्वं ङ्यापौ भवतस्तदन्तात्तद्धित इत्यर्थः। **विप्रतिषेधाद्धीति ।** स्त्रीप्रत्ययस्यावकाशो यत्र प्रकर्षो न विवक्ष्यते–'काली'ति । प्रकर्षप्रत्ययस्यावकाशो यत्र स्त्रीत्वाविवक्षा–'कालतर' इति । स्त्रीत्वप्रकर्षयोस्तु युगपद्विवक्षायां परत्वात्प्रकर्षप्रत्ययः स्यादित्यर्थः। ननु स्त्रीत्वस्यान्तरङ्गत्वात्तन्निमित्तः प्रत्ययोऽन्तरङ्गः, प्रकर्षस्तु बाह्यप्रतियोग्यपेक्षत्वाद्बहिरङ्गः । ततस्तन्निमित्तस्य प्रत्ययस्यापि बहिरङ्गत्वम् । अन्तरङ्गबहिरङ्गयोश्चाऽयुक्तो विप्रतिषेधः । तथा च वक्ष्यते–'स्वार्थमभिधाय शब्दो निरपेक्षो द्रव्यमाह समवेतं, समवेतस्य वचने–लिङ्गं संख्यां विभक्तिं चाभिधाय तान् विशेषानपेक्षमाणश्च कृत्स्नमात्मानं, प्रियकुत्सनादिषु ततः प्रवर्ततेऽसौ विभक्त्यन्तः' इति । एवं तर्ह्येतत्क्रमानाश्रयेण 'लौकिके प्रयोगे पदादुच्चरिताद्युगपदर्थाः प्रतीयन्ते' इति लौकिकार्थव्यवस्थाङ्गीकारेण न प्रातिपदिकार्थगतस्त्रीत्वप्रकर्षविवक्षाश्रयेण विप्रतिषेध उक्तः ।

**समासान्ता अपीति ।** तत्र बहवो गोमन्तोऽस्या इति बहुव्रीहौ कृते ङीपि च कबुत्पत्तौ बहुगोमतीकेति प्राप्नोति । **ब्रह्मबन्धुकेति ।** अज्ञाताद्यर्थविवक्षायामूङन्तात्कप्प्रत्यय

---

**उद्द्यो.]** ननु'ङ्याब्'ग्रहणे कृतेऽपि प्रातिपदिकत्वमाश्रित्य परत्वात्तद्धितः स्यादत आह-**सतीति ।** **'प्रकृतित्रयाऽधिकारसामर्थ्या'**दिति पाठः । **बाह्यप्रतियोग्यपेक्षत्वादिति ।** तदपेक्षप्रकर्षाद्यन्वयश्च स्वार्थे समाप्तस्यैवेति तरबादिर्बहिरङ्ग इति भावः । **स्वार्थमिति । स्वार्थो**ऽत्र प्रवृत्तिनिमित्तं । **समवेतं**–तेन स्वार्थेनाऽऽश्रितमित्यर्थः । **विभक्तिः**–कारकम् ।'यतः–कृत्स्नमात्मानपेक्षमाणः=पूर्वं तत्तद्विषयकाकांक्षावान् ,'अतः—ततः प्रियादिषु प्रवर्तते' इत्यन्वयः ।

**युगपदर्था इति ।** शब्दबुद्धिकर्मणां विरम्य व्यापाराऽयोगादिति भावः । न तु शास्त्रे (कल्पितां) कल्पितन्यायवशादारोपितक्रमवतीमर्थवत्तामाश्रित्येति तात्पर्यम् । तदाश्रयणे तु सत्यन्तरङ्गत्वादेव पूर्वं स्त्रीप्रत्यये व्यर्थमेवं ङ्याब्ग्रहणमिति भावः । भाष्ये–**तत्र समासान्तेषु दोषः**–इत्यतः प्राक्—**'तत्र को दोषः'** इति क्वाचित्कोऽपपाठः, प्रश्नस्याऽनन्वयात् । 'बहुयवमत्का' इत्युत्तरं वा स ग्रन्थः । तत्र ङ्याब्ग्रहणे कृते समासान्तेषु दोष इति

It is a reproduction of earlier edition of Vyākaraṇa Mahābhāṣya first published in 1938 edited by Pt. Nand Kishore Shastri, Varanasi

# PATAÑJALI'S VYĀKARAṆA MAHĀBHĀṢYA

WITH

KAIYAṬA'S *PRADĪPA*

AND

NĀGOJIBHAṬṬA'S *UDDYOTA*

With the Notes

By

Pt. Guruprasad Shastri

## (Vth Adhyāya)

**Pratibha Prakashan**
**Delhi**

**अयं तर्हि दोषः–"इह वचने हि लुक्प्रसङ्ग"इति[1]। न ब्रूमो यत्र क्रियमाणे दोषस्तत्र कर्त्तव्यमिति॥ किं तर्हि ?॥ यत्र क्रियमाणे न दोषस्तत्र कर्त्तव्यम्॥ क्व च क्रियमाणे न दोषः ?॥ परमार्हात्[2]॥**

**तत्तर्ह्युपसङ्ख्यानं कर्त्तव्यम् ?॥ न कर्त्तव्यम्। 'काला'दित्येव सिद्धम्॥ ननु चोक्तं–'नेमे कालशब्दाः किं तर्हि सङ्ख्याशब्दा' इति ?॥ ननु चोक्तम् 'इमेऽपि कालशब्दाः॥ कथं ?॥ सङ्ख्या सङ्ख्येये वर्त्तते॥ ननु चोक्तं–"यदि तर्हि यो यः शब्दः काले वर्त्तते स स कालशब्दो,-रमणीयादिष्वतिप्रसङ्गो भवतीति"।**

॥ * ॥ उक्तं वा[3] ॥ * ॥ **[ उक्तं वा[4] ]॥ किमुक्तम् ?॥ 'अनभिधाना'दिति। अनभिधानाद्रमणीयादिषूत्पत्तिर्न भविष्यति॥**

॥ * ॥ स्तोमे डविधिः पञ्चदशाद्यर्थः ॥ * ॥ **स्तोमे डो विधेयः॥ किं प्रयोजनम् ?॥ 'पञ्चदशाद्यर्थः'। पञ्चदशः स्तोमः सप्तदशः स्तोम इति॥**

॥ * ॥ इति श्रीमद्भगवत्**पतञ्जलि**विरचिते व्याकरण**महाभाष्ये पञ्चम**स्याध्यायस्य **प्रथमे**पादे **प्रथम**माह्निकम् ॥ ५।१।१ ॥ * ॥

---

**प्र.**]प्रत्ययो विधीयमानस्तदन्तान्न प्राप्नोति। संख्यापूर्वपदानामेव प्राग्वतेस्तदन्तविधिरिष्यते।

**खारशताद्यर्थमिति**। खारशब्दोऽकारान्तो वार्त्तिककारवचनात्साधुः। 'तदस्य परिमाण'मिति योगविभागः कर्त्तव्य इत्युक्तं भवति। **अनभिधानादिति**। नहि रमणीयादयो वृत्तिविषये काले वर्तन्ते। षष्ट्यादयस्तु वृत्तौ सङ्ख्येयेषु संवत्सरेषु स्वभावतो वर्त्तन्त इति युक्तं तेषां कालवाचित्वम्। लोके च संवत्सरसङ्ख्यया जीवितं प्रायेण परिच्छिद्यत इति संवत्सरवृत्तित्वं षष्ट्यादीनामुच्यते। **स्तोमे डविधिरिति**। डित्करणं विंशः स्तोमस्त्रिंशःस्तोमइत्यादौ टिलोपार्थं। पञ्चदश इत्यत्र तु नस्तद्धित इति टिलोपः सिध्यति। **स्तोमो** मन्त्रसमूहः ।।*।। इत्युपाध्यायजैय्यटपुत्र**कैय्यट**कृते महाभाष्य**प्रदीपे पञ्चमस्या**ध्यायस्य **प्रथमे** पादे **प्रथम**माह्निकम् ॥ ५।१।१ ।।*।।

---

**उ.**]दिवशात्तु संवत्सररूपसङ्ख्येयस्य तादृशसङ्ख्यावत्त्वेनैव शाब्दबोधे भानमित्यन्यदित्याहुः। **खारशब्द इति**। खारीशब्दपर्याय इत्यर्थः। **अन्येभ्योऽपीत्यस्य**–सङ्ख्याभिन्नेभ्य इत्यर्थः। दृशेः सर्वोपाधिव्यभिचारार्थत्वादन्येष्वपीत्यर्थोऽपि द्रष्टव्यः। **योगविभाग इति**। द्विषाष्टिकवार्षशतिकादिसिद्धये इति भावः। भाष्ये–**लुक्प्रसङ्ग इति**। 'द्विषाष्टिक' इत्यत्रेति भावः। **परमार्हादिति**। 'तदस्य परिमाण'मिति तत्र पठितव्यमित्यर्थः। **तत्तर्हीति**। 'परमार्हात्तदस्य परिमाण'मित्येतन्न कर्त्तव्यमिति खारशतिकवार्षशतिकार्थमत्र योगविभागः कार्यः, द्विषाष्टिकादिश्च 'काला'दित्येव सिद्ध इति न तदर्थः स आर्हात्परः कार्य इति भावः। **इमेऽपि कालशब्दा** इत्यनेन–कालग्रहणे यथाकथञ्चित्कालवृत्तीनां ग्रहणमिति सूचयति। अतिप्रसङ्गाऽभावस्त्वनभिधानात्। तदेवाह–**न हीति**। ननु संवत्सरेष्विति कुतो मासादीनामपि सङ्ख्येयत्वसम्भवादत आह–**लोके चेति**। **डित्करण-**

---

१ इतिः क्वचिन्नास्ति। २ 'परमर्हात्' पा.। ३ 'उक्तश्च' पा.। ४ इदं व्याख्याभाष्यं नेदानीमुपलभ्यते।

It is a reproduction of earlier edition of Vyākaraṇa Mahābhāṣya first published in 1938 edited by Pt. Nand Kishore Shastri, Varanasi

श्रीमद्भगवत्पतञ्जलिमुनिविरचितं

# व्याकरणमहाभाष्यम्

महामहोपाध्याय श्रीनागोजिभट्टविरचितमहा-
भाष्यप्रदीपोद्द्योतोद्भासितेन महामहो-
पाध्यायश्रीकैयटोपाध्याय-
विरचितेन प्रदीपेन
विराजितम्

तस्यायं-

## षष्ठोऽध्यायः

पण्डितराजश्रीस्नेहिरामशास्त्रिणां पौत्रेण, न्यायाचार्य पण्डित श्री शिवनारायणशास्त्रिणां पुत्रेण, श्रीगुरुप्रसादशास्त्रिणा व्याकरणाद्याचार्येण महता परिश्रमेण संशोधितं, टिप्पण्या संयोजितञ्च

PRATIBHA

प्रतिभा प्रकाशन, दिल्ली

**ननु चैकैकमत्राङ्गम् ? ॥**
**समुदाये या वाक्यपरिसमाप्तिस्तयाऽङ्गसंज्ञा भविष्यति ॥**
**कुत एतत् ? ॥ 'शास्त्राऽहानेः' । एवं हि शास्त्रमहीनं भवति ॥**

॥*॥इड्दीर्घप्रतिषेधश्च॥*॥ **इटो दीर्घत्वस्य च प्रतिषेधो वक्तव्यः । जरीगृहिता । जरीगृहितुम् । 'ग्रहोऽलिटि दीर्घ'इति दीर्घत्वं प्राप्नोति । स्थाने पुनर्द्विर्वचने सति**

---

**प्र.]** चैतद्व्यजङ्गं नैकाच् । **ननु चैकैकमिति** । एकमेव द्विरुच्यत इत्येकस्माद्यः प्रत्ययविधिः सोऽपरस्मादर्पाति द्वे अङ्गे भवतः, तत्र परं यदेकाजङ्गं तदाश्रय इट्प्रतिषेधःप्राप्नोतीत्यर्थः । आवृत्तिसङ्ख्याश्रया **चैकैक**मिति वीप्सा । **समुदाय इति** । एकैवाऽङ्गसंज्ञा समुदायस्य ननु पृथगवयवयोः, समुदायस्य प्राधान्यात्प्रधाने कार्यसंप्रत्ययात्समुदायव्यवहारोऽप्यावृत्तिसङ्ख्याश्रयः । **जरीगृहितेति** । जरीगृह्यशब्दात्तृच् । **ग्रहिणाङ्गमिति** । अत्र तृचो जरीगृहित्यङ्गं

---

**उ.] अङ्गमिति** । प्रत्ययविधानावधिरित्यर्थः। इदमेव ध्वनयितुं सिपेचेत्यत्र वक्ष्यति-**एकैकस्माद्-प्यत्र सुप्तिङ्विधिरिति** । नत्वेकैकमत्र पदमित्यर्थः । तेन हि एतस्य सर्वस्य तद्रीत्या व्याख्यानमिति ध्वनितं । तदाह-**एकमेवेति । एकस्मात्**-समुदायात् । **अपरस्मात्**-अवयवात् । एव-ञ्चोत्तरभिद्येत्यस्याप्यङ्गत्वं, तस्यापि प्रत्ययविधानाऽवधित्वात् । तत्राल्लोपयलोपयोरेकदेशविकृत-न्यायेन भिदित्यस्याऽप्यङ्गत्वम् । एवंचोपदेशेऽनुदात्तादेकदेशविकृतन्यायेन लोकदृष्टान्तमूलके-नैकाचो विहितत्वबुद्धिरपि तृचोऽस्त्येवेति इटः प्रतिषेधः स्यादेवेत्यर्थः । **एकैवाङ्गसंज्ञेति** । अयंभावः–'धातोस्तृज्भवती'त्यस्य धातुत्वावच्छिन्नात्तृज्भवतीत्यर्थः । तत्र तदवच्छिन्नं यद्यपि द्वयं–समुदायोऽवयवश्च, तथापि प्रधानसन्निधौ प्रधान एव कार्यप्रवृत्तेर्न्याय्यत्वेन प्रधानस्य समुदायस्यैव तद्विधानावधित्वं नावयवस्य । **एवं हि शास्त्रमहीनं भवती**त्यस्य-प्रधानन्यायेन हीनं न भवतीत्यर्थः । ननु क्रियावाचकत्वस्याऽभ्यासनैरर्थक्योक्त्या समुदाये एव पर्याप्तेर्धातुत्वमपि तत्रैवेति,-अवयवविषयकवाक्यस्य वक्तुमशक्यतया 'समुदाये या वाक्यसमाप्ति'-रित्यसङ्गतं, द्वयोः संभवे ह्येवं वक्तुं योग्यमिति चेन्न; उत्तरखण्डसाहित्यं विनाऽभ्यास-मात्रादर्थप्रत्ययाभावेन तस्य नैरर्थक्यम् । उत्तरखण्डस्य तु प्रत्ययाव्यवहितप्राग्वर्तिनः केवलस्या-र्थबोधकताया दृष्टत्वेनाऽर्थवत्त्वमेव । पेचतुरित्यादौ तदभावेऽप्युत्तरखण्डमात्रेणार्थबोधाच्च । यातेर्यङन्तात्क्विपि यातिरित्यादावियानित्यादाववशिष्टप्रत्ययादिव तत एवार्थबोध इति न तावताऽभ्यासस्यार्थवत्त्वं शङ्क्यमिति दिक् । **न तु पृथगवयवयोरिति** । एकोऽवयवशब्द-स्तद्धितसमुदायपरस्तेन पृथक् समुदायावयवयोरित्यर्थो नत्वयवयोः पृथक् प्राप्तिरस्ति । अभ्यासस्य नैरर्थक्याद्धातुत्वाभावेन प्रत्ययविधानावधित्वाभावात्सत्वेपि तदादिग्रहणेन समु-दायस्यैव प्राप्तिरिति यथाश्रुतासङ्गतिरिति बोध्यम् । **जरीगृह्यशब्दादिति** । तत्राल्लोपयलोपयोः कृतयोर्ग्रहेः पर इडिति दीर्घप्रसङ्ग इतिभावः । भाष्ये–**ग्रहिणाङ्गमिति** । उक्तरीत्या ग्रहेरिति विहितविशेषणं, तृचो जरागृहीत्यङ्गं न केवलो ग्रहिः । एकदेशविकृतन्यायेनाऽपि जरीगृहि-त्यस्यैवाङ्गत्वं नतु ग्रहेरिति भावः । **ननु चैकैकमिति** । उक्त आशयः । ननु द्विःप्रयोगे

---

१ 'एवं शास्त्रमहीनं' पा०। २ 'जरीगृहीता' पा०। ३'गृहीत्य' 'गृहि-इत्यं' ४ 'गृहित्य' पा०।

It is a reproduction of earlier edition of Vyākaraṇa Mahābhāṣya first published in 1938 edited by Pt. Nand Kishore Shastri, Varanasi

श्रीमद्भगवत्पतञ्जलिमुनिविरचितं

# व्याकरणमहाभाष्यम्

महामहोपाध्याय श्रीनागोजिभट्टविरचितमहा-
भाष्यप्रदीपोद्द्योतोद्भासितेन महामहो-
पाध्यायश्रीकैयटोपाध्याय-
विरचितेन प्रदीपेन
विराजितम्

तस्यायं–

## सप्तमोऽध्यायः

पण्डितराजश्रीस्नेहिरामशास्त्रिणां पौत्रेण, न्यायाचार्य पण्डित
श्री शिवनारायणशास्त्रिणां पुत्रेण, श्रीगुरुप्रसादशास्त्रिणा
व्याकरणाद्याचार्येण महता परिश्रमेण संशोधितं,
टिप्पण्या संयोजितञ्च

PRATIBHA

प्रतिभा प्रकाशन, दिल्ली

पधोऽच्छब्दः करिष्यते ॥ * ॥ दुक्करणाद्वा ॥ * ॥ अथवा दुग् डतरादीनामिति वक्ष्यामि ॥ * ॥ डित्करणाद्वा ॥ * अथवा डिदच्छब्दः करिष्यते॥ स तर्हि डकारः कर्तव्यः ? ॥ न कर्तव्यः । क्रियते न्यास एव । द्विडकारको निर्देशः,–'अद्ड्डतरादिभ्य' इति । [ अद्ड्डतरादिभ्यः ] ॥

## नेतराच्छन्दसि ॥ ७।१।२६॥

॥ * ॥ इतराच्छन्दसि प्रतिषेधे एकतरात्सर्वत्र ॥ * ॥ इतराच्छन्दसि प्रतिषेधे एकतरात्सर्वत्रेति वक्तव्यम् । एकतरं तिष्ठति । एकतरं पश्य ॥ ॥ * ॥ नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा विप्रतिषेधेन ॥*॥ नपुंसकादेशेभ्यो युष्मदस्मदोर्विभक्त्यादेशा भवन्ति विप्रतिषेधेन । नपुंसकादेशानामवकाशः—त्रपु त्रपुणी त्रपूणि । युष्मदस्मदोर्विभक्त्यादेशानामवकाशः—त्वं ब्राह्मणः, अहं ब्राह्मणः, युवां ब्राह्मणौ, आवां ब्राह्मणौ, यूयं ब्राह्मणाः, वयं ब्राह्मणाः । इहोभयं प्राप्नोति—त्वं ब्राह्मणकुलम् अहं ब्राह्मणकुलम् । युवां ब्राह्मणकुले आवां ब्राह्मणकुले । यूयं ब्राह्मणकुलानि, वयं ब्राह्मणकुलानि । युष्मदस्मदोर्विभक्त्यादेशा भवन्ति विप्रतिषेधेन ॥

---

प्र.]त्यम आदेर्भवति । मकारस्य तु 'संयोगान्तस्य लोप'इतिलोपः । उच्चारणार्थानां त्वनुनासिकत्वप्रतिज्ञायां 'ब्रुवो वचि'रिति वच्यादीनां नुम्प्रसङ्गः । एतस्मिन्पक्षे 'हे कतर'दित्यत्र संबुद्धिलोपप्रसङ्गं मत्वाह–दुक्करणाद्वेति । कार्यिभेदाच्च दुका लुङ्न बाध्यते । द्विडकारक इति । दकारस्य ष्टुत्वं स्वरूपविनाशप्रसङ्गान्न कृतं, नापि डकारस्य संयोगान्तलोपः ॥ [ अद्ड्डतरादिभ्यः ] ॥

नेतरा । नपुंसकादेशेभ्य इति । 'अलिङ्गे युष्मदस्मदी' इत्यनाश्रित्याऽयं विचारः । स्वौजसमां लुक्शीशयः परत्वादमा बाध्यन्त इत्यर्थः । [नेतराच्छन्दसि] ।

---

उ.] संयोगान्तस्य लोप इति । उत्तरसूत्रे झल्ग्रहणेन क्वचिदझलोऽपि लोप इत्यभिप्रेत्येदम् । ननूच्चारणार्थस्याऽपि निवृत्तयेऽनुनासिकत्वमावश्यकमत आह—उच्चारणार्थानान्त्विति । परे तु विधेयविषये उच्चारणार्थस्याऽपि निवृत्तिर्यत्नं विना दुर्लभेति अनुनासिकत्वमावश्यकं । वच्यादौ नुम् तु न, धातूपदेशे इदित्वाऽभावात् । येषां हि पदार्थोपस्थितिकाले धातुत्वं तेषामुपदेशो धातूपदेशोऽस्य तु विधानोत्तरमतिदेशेन धातुत्वं, स्थानिवद्भावेन भाव्यातिदेशिकधातुत्वं गृहीत्वेकः सत्त्वाच्चेत्याहुः ।

ननु येन नाप्राप्तिन्यायेन दुका लुको बाधे 'कतर'दित्यादिरूपाऽसिद्धिरत आह—कार्यिभेदाच्चेति । ननु कार्यिभेदेऽपि नुम्नुटोरिव बाधकत्वं दुर्वारमित्यरुचेराह—भाष्ये—अथवा डिदिति । ननु त्रिडकारक इति वक्तुं युक्तमत आह—दकारस्येति । स्वरूपेति । विवक्षितादेशरूपेत्यर्थः । नाऽपीति । पूर्वोक्तहेतोरेव । एतदर्थमेव विधेयस्याऽप्यदः पूर्वं निर्देशः । [ अद्ड्डतरादिभ्यः ] ।

नेतरा । अमा बाध्यन्त इति । विभक्त्यादेशशब्देनाऽमेवोच्यते । स्थानिभेद·

It is a reproduction of earlier edition of Vyākaraṇa Mahābhāṣya first published in 1938 edited by Pt. Nand Kishore Shastri, Varanasi

PATAÑJALI'S

# VYĀKARAṆA MAHĀBHĀṢYA

WITH

KAIYAṬA'S *PRADĪPA*

AND

NĀGOJIBHAṬṬA'S *UDDYOTA*

With the Notes

By

Pt. Guruprasad Shastri

## (VIIIth Adhyāya)

PRATIBHA

**Pratibha Prakashan**
**Delhi**

इति वक्तव्यम्। भुक्त्वा भुक्त्वा व्रजति । भोजंभोजं व्रजति । ॥* ॥ डाचि-च द्वे भवतः[1] ॥ * ॥ डाचि च द्वे भवत इति वक्तव्यम् ॥ पटपटायति घटघटायति[2] शरशरायति[3] ॥ * ॥ पूर्वप्रथमयोरर्थातिशयविवक्षायां

प्र.] तथा हि 'भुक्त्वाभुक्त्वा व्रजती'त्युक्ते सत्यपि क्रियाविच्छेदे पुनर्भुङ्क्ते पुनर्व्रजतीति क्रियाऽऽवृत्तिः प्रतीयते। नित्यता[4]-क्रियाया अविच्छेदो, यथा 'जीवतिजीवती'त्युक्ते जीवत्येवायमिति प्रतीयते न त्वावृत्तिः, न ह्यसौ जीवित्वा म्रियते मृत्वा वा जीवति, जीवनमेव दीर्घमविच्छिन्नं प्रतीयते। यत्तूक्तं भाष्ये–'तच्च आभीक्ष्ण्ये वर्तत'इति,–नित्यशब्दस्य विषयोपलक्षणार्थम्, आभीक्ष्ण्यविषयो यो नित्यशब्दस्तस्य ग्रहणमित्यर्थः। तथा च **वृत्तिकारा** आहुः–'यां क्रियां कर्ता प्राधान्येनाऽनुपरमन्करोति तन्नित्यम्'। अन्ये त्वाहुः–भुक्त्वाभुक्त्वा व्रजतीत्यादौ क्त्वाणमुलन्तस्य द्विर्वचनं प्राप्नोति तिङन्तस्य च। तत्राभीक्ष्ण्यसंशब्दनेन यो विहितस्तदन्तस्य यथा स्यात्तिङन्तस्य मा भूदिति नियमार्थमिदम्। अन्ये तु प्रत्ययेनाभीक्ष्ण्यस्य द्योतनादप्राप्तं द्विर्वचनं विधीयत इत्याहुः। अथ 'क्रियासमभिहारे द्वे भवत'इति सिद्धे 'आभीक्ष्ण्ये द्वे भवत'इति किमर्थमुच्यते। क्रियासमभिहारसंशब्दनेन यो विधीयते तदन्तस्यैव द्विर्वचनमिति कश्चिद्विपर्यस्येदिति

उ.] ऽविच्छेदौ तु न विवक्षिताविति तात्पर्यम्। **तिङन्तस्य चेति**। भोजनवद्व्रजनस्यापि पौनःपुन्यावगमादिति भावः। अत्र नियमे 'आभीक्ष्ण्यविहितप्रत्ययान्तसमभिव्याहारे'इति पूरणीयम्। तेन पचति पचतीत्यादावप्येवं सति द्विर्वचनानापत्तिरिति परास्तम्। **अन्येत्विति**। अत्राऽरुचिबीजन्तु अर्थान्तरेऽपि तयोर्विधानेन केवलयोस्तद्द्योतने सामर्थ्याऽभाव इति। आद्यं व्याख्यानमपि न युक्तं,'तच्च आभीक्ष्ण्य'इति भाष्यसङ्कोचे मानाभावात्। 'नित्यवीप्सयोरित्येव सिद्ध'मिति वृत्तिविरोधाच्च। वृत्तिस्थनित्यलक्षणमपि चिन्त्यमेव, अप्रधानक्रियाकृतविच्छेदस्य नित्येआभीक्ष्ण्ये चावश्यं सत्त्वं। विच्छेदकाऽप्रधानक्रिया च 'भुक्त्वा भुक्त्वे'त्यादावुपात्तव्रजनादिरूपैव, उपस्थितपरित्यागे मानाऽभावात्। एवं क्त्वाप्रत्ययत्त्वाद्यन्तद्वित्वाभ्यामेव व्रजनादिनिष्ठाभीक्ष्ण्यस्य द्योतनान्न त्त्वाद्यन्तसमभिव्याहारे तिङन्तस्य द्वित्वमिति द्वितीयमतमपि चिन्त्यम्। 'जीवति जीवती'त्यादौ तु 'कमलानि कमलानी'तिवदेकं जीवतिपदं दीर्घाऽविच्छिन्नजीवनलक्षकमिति न तत्र शास्त्रीयद्वित्वमिति मम प्रतिभाति। एतत्प्रयोजनन्तु पौनःपुन्यस्य केनचिद्द्योतने सौत्रद्वित्वाऽप्रवृत्तिज्ञापनमिति 'नित्यवीप्सयो'रित्यत्र उपपादितमस्माभिः। **कश्चिद्विपर्यस्येदिति**। वस्तुतस्तु इदमेव ज्ञापकं,–'तस्य लोप्येव प्रवृत्ति'रिति, तेन यङन्ते न तस्य प्रवृत्तिरित्याहुः।

१ 'डाचि चे'त्येके वार्त्तिकमाहुः। २ 'मटमटा' 'पटपटा'। ३ इदं क्वचिन्न। ४ 'त्वाक्रिया' पा०।